# पञ्चदशः पाठः

CG6IF6

**नीतिश्लोकाः**

अक्रोधेन जयेत्क्रोधम् असाधुं साधुना जयेत्।

जयेत्कदर्यं दानेन जयेत्सत्येन चानृतम् ।।1।।

गच्छन् पिपीलिको याति योजनानां शतान्यपि।

अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति ।।2।।

दिनान्ते च पिबेद् दुग्धं निशान्ते च पिबेत् पयः।

भोजनान्ते पिबेत् तक्रं किम् वैद्यस्य प्रयोजनम्।।3।।

षड्दोषाः पुरुषेणेह हातव्याः भूतिमिच्छता।

निद्रा तन्द्रा भयं क्रोधः आलस्यं दीर्घसूत्रता ।।4।।

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु

लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।

अद्यैव वा मरणमस्तु युगान्तरे वा

न्याय्यात् पथः प्रविचलन्ति पदं न धीराः ।।5।।

शब्दार्थः

**जयेत्** = जीते। **कदर्यम्** = कृपणता को। **अनृतम्** =झूठ को। **पिपीलिकः** = नर चींटी। **वैनतेयः** = गरुड़ (तेज उड़ने वाला पक्षी, विनता का पुत्र)। **दिनान्ते** = दिन के अन्त में (सायं काल)। **निशान्ते** = रात के अन्त में। **पयः** = जल। **तक्रम्** = मट्ठा। **हातव्या** = छोड़ देना चाहिए। **भूतिमिच्छता** = सम्पत्ति, ऐश्वर्य चाहने वाले। **तन्द्रा** = जागते हुए सोना। **दीर्घसूत्रता** = धीरे-धीरे कार्य करना। **आलस्यम्** = शिथिलता (सुस्ती)। **निन्दन्तु** = निन्दा करें। **स्तुवन्तु** = प्रशंसा करें। **नीतिनिपुणाः**=नीति में कुशल लोग। **समाविशतु** = आये। **यथेष्टम्** = इच्छानुसार। **अद्यैव** = आज ही। **अस्तु** = होवे (हो जाय)। **युगान्तरे** = युगों के बाद। **वा** = अथवा। **प्रविचलन्ति** = विचलित होते हैं। **धीराः** = धैर्यवान लोग।

**अन्वयः**

(1) क्रोधम् अक्रोधेन जयेत्, असाधुं साधुना जयेत्, कदर्यं दानेन जयेत्, अनृतं च सत्येन जयेत्।

(2) गच्छन् पिपीलिकः योजनानां शतानि अपि याति। अगच्छन् वैनतेयः अपि एकं पदं न गच्छति।

(3) दिनान्ते दुग्धं पिबेत्, निशान्ते पयः पिबेत्, भोजनान्ते तक्रं पिबेत्, वैद्यस्य किं प्रयोजनम्। (किमपि प्रयोजनं नास्ति)।

**6.पाठात् वाक्यानि पूरयत-**

(क) गच्छन् पिपीलिको याति योजनानां शतान्यपि।

.......................................................................................।।

(ख) निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु।

.......................................................................................।।

**7.विलोम-पदानि लिखत-**

यथा- क्रोधेन - अक्रोधेन

साधु - ........................

सत्यम् - ........................

भयम् - ........................

दिनान्ते - ........................

**शिक्षण-सङ्केतः**

(क) श्लोकानां सामूहिकं पाठं कारयत।

(ख) अन्येषां नीतिश्लोकानां बोधं कारयत।

**एतदपि जानीत-**

कुछ अन्नों के नाम संस्कृत में-

| | |
|---|---|
| गेहूँ | गोधूमः |
| उड़द | माषः |
| जव | यवः |
| सरसों | सर्षपः |
| अरहर | आढकी |
| मकई | मकायः |

| | |
|---|---|
| चना | चणकः |
| मसूर | मसूरः |
| मटर | करेणुः |
| धान | धान्यम् |

नहि कृतमुपकारं साधवो विस्मरन्ति।